# Matribhumi Stava

# मातृभूमिस्तवः

## Document Information

Text title : Matribhumi Stava

File name : mAtRRibhUmistavaH.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# मातृभूमिस्तवः

(गीतिका) (स्रग्विणी वृतम्)
मातृभूमि सदा देवभूमि शुभा
देववर्यैर्वृता वीरवर्यै स्तुता ।
भारती भूरिय रत्नगर्भा मता
स्वर्णभूमिर्मणीना सनि समता ॥ मातृ० ॥

मातृभूमेस्तु तुल्य न किञ्चिद् भवे
मातृभूमिस्तु स्वर्गादपि श्रेयसी ।
प्राणदात्री सदा चान्नदात्री स्थिता
पालिका पोषिका मातृरूपा मता ॥ मातृ० ॥

मातृभूमि सदा वन्द्यते स्तूयते
पुत्ररूपा वयं स्नेहभाजो मता ।
मातृभूमेर्ऋणान्नैव मुक्तिभवे
प्राणदान सदाऽपेक्षते मातृभू ॥ मातृ० ॥

क्रान्तिदूतैः सदा प्राणदानैः स्तुता
शान्तिदूतैः सदा स्वार्थत्यागाद् वृता ।
धर्मनिष्ठैः स्वदेहार्पणेनाऽऽदृता
देशभक्तैश्च शूलि प्रियेवाऽऽदृता ॥ मातृ० ॥

स्वर्गरूपा सदा स्नेहरूपा प्रिया
हैम-विन्ध्याद्रिमाला-गुणालङ्कृता ।
शस्य श्यामा सरिद्धि सुरक्ताञ्चिता
पद्मजा शैलजा नीरजेवाऽऽदृता ॥ मातृ० ॥

अन्नदानैः सदा तोयदानैः स्तुता
कन्द-मूलैः सुपुष्पैः फलैर्मण्डिता ।
पूतपासु श्रिता तीर्थराजैः शुभैः

मातृशक्तिः सदा प्रेरणादायिनी ॥ मातृ० ॥

शक्तिदात्री सदा स्नेहस्रोत प्रिया
सौख्यधामी सदा शान्तिरूपा मता ।
तेऽङ्घ्रियुग्म सदा पाप-सन्तापहं
दोषह रोषह क्लेशह द्वेषहम् ॥ मातृ० ॥

विश्वशान्ते सदा शिक्षिका शान्तिदा
शान्तिधामाऽश्रया श्रेयसे ज्ञानदा ।
विश्ववन्धुत्व-शिक्षाप्रदा भैरवा
शत्रु-संहारिणी दैत्य विध्वंसिनी ॥ मातृ० ॥

भारतीया समे ते सुता लालिता
पालिता पोषिता स्नेह-संवर्धिता ।
भ्रातृरूपा न तेषां विरोध शुभ
स्नेह-भावोदय प्रोते कारक ॥ मात० ॥

धर्मभेदो न वा जातिभेद शुभो ।
वर्गभेदो न वा वर्णभेद शुभ ।
मातृभूमे समुत्कर्षहेतोर्मुदा
प्राणदानं वरं वित्तदानं शुभम् ॥ मातृ० ॥

Proofread by Mandar Mali

*Matribhumi Stava*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*